International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2016; 1(1): 23-27
© 2016 Jyotish
www.jyotishajournal.com
Received: 24-05-2016
Accepted: 25-06-2016

**डॉ. शुभस्मितामिश्रः**
सहायकाचार्या, ज्योतिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
जयपुरपरिसरः, जयपुरम्

**Correspondence**
**डॉ. शुभस्मितामिश्रः**
सहायकाचार्या, ज्योतिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
जयपुरपरिसरः, जयपुरम्

# विद्याभावमीमांसा

**डॉ. शुभस्मितामिश्रः**

**प्रस्तावना**

दुर्गासप्तसत्याः प्रथमाध्याये उक्तम् [1] –

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्।
संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति।।

अर्थात् अस्यां भूमौ मानवस्य प्रकारद्वयं वर्त्तते 1. सम्यग्व्यशीलः, 2. असम्यग्व्ययशीलश्च। यः ईश्वरप्रदत्तशक्तेः प्रयोगः सम्यग्मार्गे, समाजस्य कल्याणे, प्रकृतेः व्यवस्थायाः सम्यक्संचालने करोति तस्य सामर्थ्यमनुदिनं वर्धिष्णुः भवति। ईश्वरनिर्मितप्रकृते आनन्दमनुभवन् अन्ते जगदम्बिकायाः धामं प्रति गच्छति परम यः स्वशक्त्याभिमाने ईश्वरनिर्मितप्रकृतेरनादरं कुर्वन् शक्तेः प्रयोगः असम्यक्मार्गे करोति तस्य शक्तिः शनैः शनैः क्षीणो भवति तथा अन्ते नष्टो भवति। यतोहि मानवः जन्मजन्मान्तरेषूपार्जितकर्मणां भोगः वर्त्तमानजन्मनि करोति। पूर्वजन्मनोपार्जितपूण्यबलादेव ज्ञानवान्, धनवान्, सर्वशक्तिमान् च मानवो भवति। मानवः पृथिव्यां कर्मणां भोगार्थमागच्छति। यदा सदसदकर्मणां भोगः पूर्णो भवति तदा मुक्तो जायते। देवीभागवते उक्तं यत् न भुंक्ते क्षीयते कर्म कल्पकोटिशतैरपि। यथा पुण्यस्य सद्कर्मणि व्ययेन पुण्यस्य वृद्धिर्भवति तदवदेव विद्यायाः सम्यग्प्रयोगेन विद्यायाः वृद्धिर्जायते। अयं नियमः सर्वत्र प्रयुज्यते। यद्यपि विद्यायाः नित्यव्ययेन विद्या वर्धिष्णु भवति परम अत्रापि अयं नियमः प्रयुज्यते अर्थात् यदि विद्यायाः व्ययः मानवकल्याणे भवति तर्हि वेदान्तसारग्रन्थोक्तपंचकोषानां वृद्धिर्जायते अन्यथा सर्वं नष्टं भवति।
ज्ञानार्थकाद् विद्धातोः विद्या शब्दः निष्पद्यते। कस्यचिदपि विषयस्य सम्यग्ज्ञानं विद्या इत्युच्यते। मुण्डकोपनिषदानुसारं विद्या द्विविधा एका परा अन्या अपरा च। यया विद्यया वेदवेदांगादिलौकिकज्ञानं जायते सा अपरा विद्या। यया विद्यया अक्षरब्रह्मविषयकं ज्ञानमधिगम्यते सा परा विद्या। यथोक्तम् –

द्वे विद्ये वेदितव्ये.......परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदो अथर्ववेदः
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते [2]।

वस्तुतः विद्या पुरुषस्य हृदि आवृतं सुरक्षितं सर्वोत्कृष्टरूपं धनं चास्ति। विद्या अखिलभोग्यपदार्थसम्पादिका, यशानन्दप्रदा, सत्कारयोग्यानामपि सत्कारयोगाऽस्ति। विद्या नृपेषु पूज्यते। विद्या विहीनः पुरुषः पशुप्रायो भवति [3]। नीतिशतकेऽपि कविभर्तृहरिः मानवस्य विविधगुणान् निरूपयन् विद्यायाः महत्तां प्रतिपादितं यत् यस्य मानवस्य पार्श्वे प्रशस्या (अनवद्या) विद्या विद्यते तस्य धनैः किमपि प्रयोजनं नास्ति [4]। वेद्यन्ते ज्ञायन्ते धर्मार्थकाममोक्षाः अनया सा विद्या। विद्या सर्वेभ्यः धनेभ्यः उत्तमाः सर्वकार्यसाधिकाश्च भवति। यथोक्तम् –

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भरती।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात्।।

---

[1] श्रीदुर्गासप्तशती, अ.1, श्लो. 15,
[2] मुण्डकोपनिषद् 1/1/4,5
[3] विद्या नाम नरस्य रूपमधिकं..........पूज्यते न तु धनं विद्याविहीनं पशुः।। नीतिशतकम्, श्लो. 20,
[4] नीतिशतकम्, श्लो. 21,

अस्मिन् जगति नास्ति तादृशं किंचिद्वस्तुं यद् व्ययेन वर्धतां संचयाच्च क्षीणताम्। अर्थात् विद्यारूपिधनस्य इयं विशेषता यथा यथा विद्याधनं व्ययी क्रियते तथा तथा वद्धते। सर्वेषु द्रव्येषु विद्यारूपिं द्रव्यं उत्तमम्। यतोहि इदं अहार्यं, अनर्घ्यम्, अक्षयम्, सर्वदाऽनश्वरं विद्यते।

न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धते एव नित्यं विद्याधनं सर्वधनं प्रधानम्।।

अन्यानि धनानि चौरैः ह्रियन्ते, नृपेन बलादाहार्यन्ते, बन्धुभिः विभज्यन्ते, क्षीयन्तेऽपचीयन्ते च परन्तु विद्याधनं न चौरैः हृयन्ते, न नृपेण बलाद् अहार्यन्ते, न बन्धुभिः विभज्यन्ते, न क्षीयन्ते। तस्मादेतद्विद्याधनं सर्वधनप्रधानमस्ति।

मातेव रक्षति पितेव हिते नियुंक्ते कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षुकीर्तिं किं किं न साधयति कल्पलतेव विद्या।।

विद्या प्रभावमन्तरेण मानवानामज्ञानान्धकारो नश्यति। गन्धविहीनं पुष्पं शशिविहीना निशा इव, जीवनं विना शरीरं इव, जलं विना वापीव, रसं विना कविरेव, विद्याविहीनं जीवनं नितरां व्यर्थं भवति। विद्वान् सर्वत्र पूज्यते। शास्त्रेषु उक्तं वर्त्तते यत् विद्यया सर्वं सिद्धं भवति, विद्यया संपत्तेर्लाभस्तथा आयुयशज्ञानानां ज्ञानात् सर्वेषां पदार्थानामनुभवो जायत [5] । श्रीभास्कराचार्येण स्वकीयसिद्धान्तशिरोमणिग्रन्थस्य त्रिप्रश्नाधिकारस्य भाष्ये उक्तं यथा –

विद्यानाम नरस्य कीर्तिरतुला भाग्यक्षयेचाश्रयो, धेनुः कामदुधा रतिश्च विरहे नेत्रं तृतीयं च सा।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणं, तस्मादन्यमपोह्य हेतुविषयं विद्याधिकारं कुरु।।

यत् विद्यया मानवस्य अतुला कीर्तिर्भवति। विद्या भाग्यस्य क्षयकालेऽऽश्रयप्रदाता भवति। विद्या कामधेनुरिव अभिष्ठफलप्रदाता, विप्रलम्भे अनुरागयुक्ता, मानवस्य तृतीयनेत्रस्वरूपा, सभायां सत्कारस्वरूपा, कुलस्य महिमाप्रदातारो वर्त्ततेऽतएव यथा रत्नं विना अलंकारः सुशोभितो न भवति तदेव विद्यां विना मानवस्य शोभा न भवति। अतएव सर्वं विहायेच्छानुसारं विद्याया अर्जनं कर्त्तव्यम्। अनेन ज्ञायते यत् मानवजीवने विद्यायाः विशेषमहत्त्वं वर्त्तते। अतः विद्यायाः महत्त्वं प्रत्यक्षेन परिलक्षिताः दैवज्ञाः जातकग्रन्थेषु विभिन्नविद्याप्राप्तियोगाः निरूपिताः।

### विद्याकारकग्रहाः

जन्मकुण्डल्यां लग्नादिद्वादशभावाः सन्ति। प्रत्येकेषु भावेषु तत् तत् भावसम्बन्धिविषयाणां विचाराश्च क्रियन्ते। कुण्डल्यां द्वादशभावेषु द्वितीयचतुर्थपंचमभावेषु विद्याबुद्धिज्ञानविषयकचिन्ता क्रियते। वस्तुतः मस्तिष्कबलेन प्राप्तं ज्ञानं बुद्धिः कथ्यते यतोहि बुद्धिरेव पारमार्थिकं बीजम्। बुद्धिस्तथा उच्चशिक्षायाः सम्बन्धः कुण्डल्यां पंचमभावेन भवति। मनबलेन प्राप्तज्ञानस्य सम्बन्धः चतुर्थभावेन साकं तथा च प्राथमिकशिक्षायाः सम्बन्धः कुण्डल्यां द्वितीयभावेन साकं भवति। गुप्तविद्यायाः सम्बन्धः अष्टमभावेन साकं भवति। कुण्डल्यां पंचमद्वितीयभावयोः कारकग्रहः गुरुः, चतुर्थभावकारकौ चन्द्रबुधौ तथा च अष्टमभावकारकग्रहः शनिर्भवति। अतः द्वितीयपंचमचतुर्थेशाः विद्याकारकाः एतेषां एतै भावकारकैः गुरुचन्द्रबुधैः सह सम्बन्धः विद्याबुद्धिज्ञानप्रदायको भवति। द्वितीयचतुर्थपंचमभावकारकाः, द्वितीयचतुर्थपंचमभावाधिपाः, द्वितीयचतुर्थपंचमभावाश्रिताः बलीग्रहास्तथा द्वितीयचतुर्थपंचमभावाधिपाधिष्ठितभावाश्च विद्याकारका भवन्ति। एते ग्रहाः भावाश्च यदि स्वस्वोच्चराशिगताः, शुभबलयुक्ताः,षड्बलैर्युक्ताः स्युः तदा जातकः सुविद्यया युक्तो भवति। कुण्डल्यां बुध्स्य शुभाशुभस्थित्यानुसारं विद्याध्ययनस्य, विद्याग्रहणशक्तेः विचारश्च क्रियते। गुरुग्रहस्य शुभाशुभस्थित्यानुसारं विद्यायाः विकासस्य विचारः क्रियते। कुण्डल्यां विद्याजनितयशकीर्त्यादीनां विचारः दशमभावात् क्रियते। नवमभावः भाग्यभावः अतः विद्यायाः नवमभावेनापि सम्बन्धः वत्तत्येव। यथोक्तं उत्तरकालामृतग्रन्थे –

दानं धर्मसुतीर्थं सेवनतपोगुर्वादि भक्त्यौषधा–
चाराश्चित्तविशुद्धिदेवभजने विद्याश्रमो वैभवः।।

का.ख. श्लो. 16,

परं महर्षिजैमिनिना स्वकीयग्रन्थे विद्याविषयकचिन्तनं कारकांशकुण्डली वशात् कृतमतः तेषां मतेन कारकांशकुण्डल्याः लग्नात् पंचमभावाच्च विद्याविषयकविचारः समुचितः यतोहि कुण्डल्यां आत्मकारकग्रहः जातकस्य सुखदुःखयो कारणभूतो भवति। आत्मकारकग्रहवशात् निर्मितकारकांशकुण्डल्याः पंचमभावात् लग्नाच्च विद्याविषयकविचारः तथा तदगतग्रहानुरोधेन विद्यायाः दिशानिर्णयः समुचितः प्रतिभाति [6]।

### सूर्यादिभिर्ग्रहैः विद्यायाः दिशाविचारः

विद्या हि ज्ञानविशेषरूपा। विद्याबलेनैव मानवः त्रिभुवनं करतलस्थितामलकवत् पश्यति। विद्यतेऽसौ इति विद्या। बुध्यतेऽनेनेति बुद्धिः। वेदान्तसारमतेन ''निश्चयात्मिकान्तःकरणवृत्तिः बुद्धिः''। नागभट्टमतेन बुद्धिः ''सविकल्पकज्ञानम्''। सांख्यमतेन'' अर्थाकारेण परिणताया बुद्धि वृत्तेश्चेतने प्रतिबिम्बनात् विषयप्रकाशरूपं ज्ञानम् ''। गरूडपुराणमतेन स बुद्धिमान् यो न करोति पापम्। संस्कृतवाङ्मये चतुर्दशविद्याः सन्ति ते च 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदः, 4. अथर्ववेदः, 5. शिक्षा, 6. कल्पः, 7. व्याकरणम्, 8. निरूक्तम्, 9. छन्द, 10. ज्योतिषम्, 11. मीमांसा, 12. न्यायवैशेषिकौ, 13. पुराणम्, 14. धर्मशास्त्रेति। एवमेव आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं च चतस्रः उपविद्याः सन्ति [7]।

द्वितीयभावमुपरि द्वितीयभावगतग्रहोपरि च यादृशस्य ग्रहस्य प्रभावो भवति जातकस्य विद्या तादृशी भवति। यदि द्वितीयभावभावेशयोः उपरि बुधगुरुशुक्राणां प्रभावो भवेत्तर्हि जतकः न्यायाधीशो भवति। जातकः B.A, L.L.B, आद्युपाधिना युक्तो भवति। यदि सूर्यशनिराहुग्रहाणां प्रभावो भवेत्तर्हि वैद्यो (M.B.B.S) भवति। यदि शुक्रबुधयोः प्रभावो भवति चेत् कलाशास्त्रे निपुणो भवति। द्वितीयेशद्वितीयभावयोः सम्बन्धः यदि पंचमभावेन तथा शुक्रेण स्यात्तर्हि जतकः संगीतज्ञो भवति। विशेषरूपेण गुरोः वेदवेदान्तव्याकरणादिशास्त्राणां, बुधात् ज्योतिषगणितवैद्यकशास्त्राणां, शुक्रात् संगीतकलादिशास्त्रेषु तथा प्रभावशालीव्याख्यानशक्तेः, भौमात् न्यायशासनगणितानां, सूर्यात् वेदान्तशास्त्रस्य, चन्द्रात् वैद्यकस्य, शनिराहुग्रहाभ्यां अन्यदेशीयविद्यानां विचारस्तथा शनिभौमाभ्यां सैनिको भवति।

### विद्यायाः प्राप्तिर्योगाः

द्वितीयाधिपस्य सूर्येण साकं सम्बन्धेन जातकः विद्यां धनं च प्राप्नोति। यदि द्वितीयाधिपस्य शनिना साकं सम्बन्धो भवेत् तर्हि जातकः क्षुद्रस्तथाऽल्पविद्यायुक्तो भवति। अष्टमभावादनुसन्धानाविष्कारादीनां विचारः क्रियते। ''भावात् भवम्'' सिद्धान्तानुसारं तृतीयभावादपि एतेषां विचारं करणीयम्। अतः बलयुक्तयोः अष्टमेशतृतीयेशयोः यतिः सम्बन्धेन जातकः वैज्ञानिको भवति। शुक्रगुरुबुधाः यदि केन्द्रे त्रिकोणे वा द्वितीये स्वोच्चराशिगताः स्वमित्रराशिगताः स्युस्तथा गुरुः बलयुक्तो

[5] विद्यया सर्वसिद्धिः स्यात्संपदः........आयुर्यशश्च बोधं च बोधात्सर्वासु भावयेत्।। बृ. द.रं., प्र. 68, श्लो. 4,

[6] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 102–114,

[7] अंगानि वेदाश्चत्वारो मीमांसा....................उपविद्याः प्रकीर्तिताः।। बृ. दैवज्ञरंजनम्, प्र. 68, श्लो. 10–11,

भवति चेत् सरस्वतीयोगो भवति। सरस्वतीयोगोत्पन्नजातकः विद्वान्, कलाकारः, कविताप्रबन्धादिरचनायां पारंगतो भवति।
यथोक्तम् –

धीमान् नाटकगद्यपद्यगणना अलंकारशास्त्रेष्वयम्।
निष्णातः कविताप्रबन्धरचनाशास्त्रस्य पारंगतः।।
फलदीपिका, अ.6, श्लो.27,

पापग्रहेण युक्तो दृष्टो अथवा पापराशिगतः चतुर्थेशः यदि त्रिकभावगतो भवेत् तर्हि जातकः विद्याहीनो भवति। यदि विद्याबुद्धिकारकाः अर्थात् चतुर्थेशगुरुबुधाः त्रिकभावगताः अथवा नीचे शत्रुगृहे वा स्थिताः भवेयुस्तदा जातकः विद्याबुद्धिविवेकहीनो भवति। यदि ऐते विद्याबुद्धिकारकग्रहाः स्व–स्वोच्चे, स्वर्क्षे, त्रिकोणे, केन्द्रेषु स्थिताः भवेयुस्तदा जातकः श्रीविद्याविनयादिभिर्युक्तो भवति [8]। द्वितीयेशबुधगुरवः अष्टमभावस्थाः स्युः तर्हि जातकः विद्यया रहितो भवति। यदि एते ग्रहाः केन्द्रे, त्रिकोणे अथवा स्वराशौ भवेयुस्तदा जातकः विद्वान् भवति[9]।
पंचमभावे शुभग्रहेण युक्तो दृष्टो वा पंचमेशः स्यादथवा पंचमे बुद्धिकारकबलयुक्तो बुधः स्यात् तर्हि जातकः विद्याविनयाभ्यां युक्तश्चतुरो भवति। सूर्यात् कालांशान्तरेण स्थितः बुधः लग्ने त्रिकोणे वा स्यात् तर्हि जातकः विद्याबुद्धिविनयेषूत्तमो भवति। पापग्रहेण युक्तः पापराशिगतः पंचमेशः त्रिके स्यात्तर्हि विद्यया हीनो भवति। विद्याभावाधिपगुरुबुधानां तृतीयव्ययाष्टमषष्ठभावगतेषु, नीचशत्रुस्थानगतेषु च जातकः विद्याबुद्धिविवेकहीनो भवति। यथोक्तं जातकपारिजाते –

विद्यास्थानपजीवचन्द्रतनयाः षट्त्रिव्ययायुः स्थिता
विद्याबुद्धिविवेकहीनफलदा नीचारिगा वा यदि।।
अध्या. 12, श्लो. 61

पंचमेशः यदि केन्द्रे त्रिकोणे वा भवेत् तर्हि जातकः विद्यावान् भवति। त्रिकभावगते पंचमेशे जातकः विद्याहीनो भवति। त्रिकभावगतपंचमेशः बुधगुरूभ्यां युक्तोऽपि विद्यया हीनं करोति। गुरुपंचमेशौ त्रिकभावगतौ स्यातां तर्हि जातकः विद्यया युक्तोऽपि सभायां मुको भवति [10]। एवमेव जातकालंकारे उक्तं यथा [11]–

विद्यास्थानाधिपो वा बुधगुरुसहितश्चेत् त्रिके वर्तमानो,
विद्याहीनो नरः स्यादथ नवमनिजक्षेत्रकेन्द्रेषु तद्वान्।

बुधशुक्राभ्यां दृष्टाः राहुशनिगुरवः एकस्मिन् भावे स्थिताः स्युः तर्हि जातकः हीनकुलोत्पन्नोऽपि निखिलविद्यासु निष्णातो भवति [12]। जातकतत्त्वकारेण उक्तं यत् शनिराहुकेतुभिर्युक्तः गुरुः शुक्रेण दृष्टः स्यात् तर्हि हीनकुलोत्पन्नोऽपि विद्वान् भवति। यथोक्तम् –

ध्वजाहिमन्दैः सहितेज्ये शुक्रेक्षिते शुद्रोऽपि विद्वान्।।
जा.त.पंचमविवेकः सूत्रसंख्या 71,

यदि बुधभौमौ शुभग्रहस्य राशौ भवतः तदा जातकः विदुषां रंजको भवति। यदि एतौ ग्रहौ शनेः राशौ भवतस्तथा शनिना दृष्टौ भवतः तदा जातकः राजविदुषां रंजको भवति [13]।

### बुद्धिमन्तो योगाः

मानवजीवने विद्यया सह बुद्धिबलमपि परमावश्यकमस्ति। यतोहि बुद्धिबलेनैव विद्या सर्वविषयसारयुक्ता भवति। सूक्ष्माबुद्धिः पारमार्थिकसत्तायां दर्शने प्रयुक्ता। बुद्धेः स्वरूपविषये ब्रह्मवैवर्तपुराणे उक्तं यत् ''बुद्धिर्विवेचनारूपा सा ज्ञानजननी श्रुतौ[14]''। सा बुद्धिः सात्विकराजसतामसभेदेन त्रिविधा। यथोक्तम् [15]–

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ! सात्विकी।।
यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी।।
अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी।।

बुद्धिशब्दः प्राचीनकालादेव व्यक्तेः तत्परता, तात्कालिकता, समायोजनं तथा समस्यायाः समाधानक्षमता सन्दर्भे च प्रयोगो भवति। मनोवैज्ञानिकवुडरोमहोदयानुसारं बुद्धिः ज्ञानार्जनक्षमतायाः द्योतको वर्त्तते। मनोवैज्ञानिकरायबर्न– महोदयानुसारं ''Intelligence is the power which enables us to solve problemsAnd toAchieve our purposes. [16] ''यथा मनोविज्ञानमाधुनिककाले मानवस्य व्यवहारविषयेऽध्ययनं करोति तथैव ज्योतिषशास्त्रान्तर्गतहोरा– शास्त्रं प्राचीनकालादेव मानवजीवनस्य सांगोपांगमध्ययनं करोति। ज्योतिषशास्त्रं मनोविज्ञानस्य मूले तिष्ठति। इदमेव कारणं वर्त्तते यत् जन्मांगस्थितद्वादशभावाः जीवनस्य प्रत्येकभागस्यपरिचायको भवति संक्षेपेण वक्तुं शक्यते यत् मानवस्य जन्मकालात् समारभ्य मृत्युकालं यावत् जायमानानां सम्पूर्णघटनाचक्राणां पूर्वज्ञानं प्रददाति ज्योतिषशास्त्रम्। वस्तुतः यथा विद्या बुद्धिं विना पूर्णतां न प्राप्नोति तथैव बुद्धिरपि विद्यां विना शोभां न प्राप्नोति। अतः कुण्डल्यां विद्याविचारेण साकं बुद्धेः विचारः प्रत्येकग्रन्थेषु प्राप्यते। कुण्डल्यां पंचमभावात् बुद्धिविचारः क्रियते। अतः पंचमभावाधिपः यदि शुभग्रहाणां राशौ, शुभग्रहाणां दृष्टौ, पूर्णबलयुक्तः, शुभग्रहस्य वैशेषिकांशे, स्वपरमोच्चांशे, शुभग्रहयोर्मध्ये, शुभनवमांशगतः, शुभग्रहैर्युक्तश्च वा स्यात् तर्हि जातकः मतिमान् बुद्धिमान् च भवति। पंचमभावकारकस्थितराश्यांशेशः यदि केन्द्रे, त्रिकोणे वा स्यात्तर्हि तीव्रबुद्धियुक्तो भवति। यदि पंचमाधिपः शुभग्रहयोर्मध्ये, शुभग्रहेण युक्तः स्यात् तथा गुरुः केन्द्रे वा त्रिकोणे स्यात्तर्हि जातकः बुद्धिमार्गविशारदो भवति। पंचमाधिपः बुधः स्यात्, पंचमभावे गुरुः स्यात्तथा पंचमभावस्य द्वितीयभावे द्वादशभावे च ग्रहो भवेत्तर्हि जातको बुद्धिमान् भवति। पंचमेशपंचमभावकारकौ गोपुराद्यंशे भवेतां तर्हि धारणादिपटुर्भवेत्[17]। बलवान् पंचमेशः बुधगुरुभ्यां युक्तः केन्द्रे त्रिकोणे वा भवेत्तर्हि जातको बुद्धिमान् भवति[18]। यदि कुण्डल्यां पंचमभावे बुधगुरुशुक्रेषु कश्चिदेको ग्रहः स्यादथवा कश्चिदेकेन ग्रहेण दृष्टः स्यात्तर्हि जातकशास्त्रविशारदो बुद्धिमान् च भवति। लग्ने चन्द्रः, दशमे स्ववर्गगतशनिः बुधेन दृष्टः स्यात्तर्हि बुद्धियुक्तो मानवो भवति। जातकभूषणानुसारं दशमपंचमनवमेशाः यदि स्वराशिगताः स्युः तेषु सर्वाधिकबलीग्रहस्य दशायां जातकः सुबुद्धिं प्राप्नोति। जैमिनिसूत्रे आत्मकारकवशात् बुद्धिमन्तो योगाः वर्णिताः सन्ति। आत्मकारकात् तृतीयषष्ठभावगताः ग्रहा अथवा तृतीयषष्ठभावाधीपती अथवा पंचमभावाधीपतिः यदि आत्मकारकं पश्यति तर्हि जातकः धीमन्तो भवति। एवमेव कारकांशलग्नात् तृतीयषष्ठभावगताः ग्रहा अथवा तृतीयषष्ठभावाधीपती अथवा पंचमभावाधीपतिः यदि लग्नं पश्यति तर्हि जातकः बुद्धिमान् भवति। आत्मकारकात् तृतीयषष्ठभावाधीपती यदि लग्नं पश्यत अथवा लग्नात् तृतीयषष्ठभावाधीपती यदि आत्मकारकं पश्यतः तर्हि जातकः धीमान् भवति [19]। एवमेव जातकालंकारे उक्तं यथा [20]–

---

8 जातकपारिजातः, अध्यायः 11, श्लो. 61–62,
9 जातकपारिजातः, अध्यायः 11, श्लो. 77,
10 जातकभूषणम्, अ. 7, श्लो. 17,
11 जातकालंकारः, पंचमभावविचारः, श्लो. 11,
12 फलितमार्त्तण्डः, भावफलाध्यायः, श्लो. 1,2,5,
13 जा.त.पंचमविवेकः सूत्रसंख्या 57–58,
14 ब्रह्मवैवर्तपुराणम्, प्रकृतिखण्डः, अध्या. 23,
15 श्रीमद्भगवद्गीता अध्या. 18, श्लो. 30 – 32,
16 Ryburn page 216
17 सर्वार्थचिन्तामणिः, अध्यायः 5, श्लो. 32–42,
18 जातकपारिजातः, अध्यायः 11, श्लो. 67,
19 जैमिनीसूत्रम् अ. 1, पा. 3, सू. 37,
20 जातकालंकारः, पंचमभावविचारः, श्लो. 11,

बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले तदा स्या–
त्प्रज्ञामान्द्यं नराणामथ यदि विहगः स्वर्क्षगो दोषहृत् स्यात्।।

अपि च,

प्रालेयांशौ तनुस्थे गगनसदनगे साधिकारेऽर्कसूनौ,
दृष्टेऽस्मिन्कामदृष्ट्या हिमकिरणभुवा बुद्धियुङ्मानवः स्यात्।

पराशरमतेन द्वितीयेशः तृतीयेऽथवा तृतीयेशः लग्नेऽथवा धूमग्रहः तृतीयेऽथवा दशमेऽथवा शिखी पंचमे, प्राणपदो दशमेऽथवा पदादुपपदात् वा द्वितीये शुभग्रहाः स्युः अथवा सार्गलपंचमभावः स्यात्तर्हि जातको बुद्धिमान् भवति।

**बुद्धिहीनयोगाः**

द्वितीये यदि पापग्रहः स्यात्तर्हि जातकः मूर्खो भवति [21]। पंचमभावकारको गुरुर्भवत्यतः ''कारको भावनाशाय'' इति सूत्रानुसारं पंचमभावगतगुरुः बुद्धिनाशं करोति। यदि पंचमभावकारकः शुभग्रहेण युक्तः स्यात् परं यदि पंचमेशः पापग्रहेण युक्तः क्रूरषष्ठ्यंशगतो वा स्यात् तर्हि जातकस्य सर्वदा बुद्धिभ्रमो भवति। मान्दीराहुशनिभिर्युक्तः पंचमभावः यदि शुभवर्जितः स्यात्तथा पंचमेशः पापग्रहेण दृष्टः स्यात्तर्हि जातकस्य सर्वदा मतिभ्रमो भवति। नीच्चराशिगतपंचमेशः यद्यस्तंगतो, शत्रुराशिगतो, क्रूरषष्ठ्यंशगतो वा भवेत्तदा बुद्धिनाशो भवति। पंचमभावगतशनिः पंचमभावाधिपतिः पापग्रहेण युक्तः वा स्यात्तर्हि जातकस्य बुद्धिजाड्यं भवति। यदि चन्द्रलग्नेशौ भौमस्य पूर्णदृष्ट्या युक्तो भवेतामथवा लग्नगतभौमचन्द्रौ बुधस्य पूर्णदृष्ट्या युक्तो भवेतां वा लग्नगतशनिचन्द्रौ कुजस्य पूर्णदृष्ट्या युक्तो भवेतां वा सूर्यचन्द्रयोर्मध्ये भौमश्चेदथवा लग्नस्थितचन्द्रः शनिभौमाभ्यां दृष्टः स्यात्तर्हि जातको बुद्धिहीनो भवति [22]। नीचराशिस्थितबुधः क्रूरग्रहदृष्ट्यायुक्तः, शुभग्रहदृष्ट्या विवर्जितः स्यात्तथा शनिसूर्यौ एकराश्यंशयुक्तौ षष्ठभावे भवेतां तर्हि जातकः बुद्धिहीनो भवति। एवमेव जातकालंकारे उक्तं यथा –

लग्नस्थं प्श्यतीन्दुं दिनमणि तनयं भूमिजो द्यूनदृष्ट्या,
बुद्ध्या हीनो नरः स्यादिनविधुविवरे भूमिजश्चेत्तथैव।।

जा.लं. यो. 3, श्लो.10,

पृथ्वीसूनुं मृगांकं तनुनिलयगतं पूर्णदृष्ट्येन्दु सूनुः,
पश्येच्चेद् बुद्धिहीनस्त्वथ शशितनुपौ भूभुवा पीडितौ वा।।

जा.लं.यो. 3, श्लो.11,

**शास्त्रज्ञयोगाः**

यदि गुरुः केन्द्रत्रिकोणगतो भवेत् तथा च शुक्रः स्वोच्चराशौ वा द्वितीयेशः बुधः स्वोच्चराशौ यथा सम्भवं भवेत्तर्हि जातकः गणितशास्त्रज्ञो भवति। चतुर्थे यदि बुधः स्यात्तर्हि जातकः गणितज्ञो भवति। द्वितीये भावे सूर्यबुधौ स्यातां तदा जातकः ज्योतिषशास्त्रविशारदो भवति तत्र द्वितीयभावगतसूर्यबुधयोरुपरि शनेः दृष्टिर्भवेत्तदा जातकः गणितज्ञो भवति। जातकतत्त्वग्रन्थानुसारं द्वितीये भावे शुभग्रहेण दृष्टः भौमः स्यादथवा द्वितीयभावगतचन्द्रः भौमो वा बुधेन दृष्टः स्यात्तथा केन्द्रे बुधः वा कुजः स्यादथवा लग्ने स्वोच्चराशौ वा द्वितीयेशः बुधः, लग्ने बृहस्पति, अष्टमे शनिः स्यादथवा बुधः द्वितीये, गुरुः केन्द्रे त्रिकोणे स्यात्तथा बलवान् शुक्रः यत्र कुत्रापि स्यात्तर्हि जातकः गणितशास्त्रमर्मज्ञो भवति [23]। कारकांशकुण्डल्यां लग्ने अथवा पंचमे यदि केतुः स्यात्तर्हि जातकः गणितशास्त्रमर्मज्ञो भवति [24]। तृतीयेशेन युक्तः बुधः केन्द्रे अथवा चन्द्रेन युक्तः बुधः केन्द्रे स्यात् तर्हि जातको गणितज्ञो भवति।

केनचिच्छुभग्रहेण साकं भौमः यदि द्वितीये बुधेन सन्दृष्टो वा बुधः केन्द्रगतो भवेत्तर्हि जातकः ज्योतिर्विदो भवति। बृहस्पतिः स्वनवांशे, शुभषष्ठ्यंशे, गोपुरादिवैशेषिकांशे, शुभग्रहस्य नवांशे वा शुभग्रहेणावलोकितः स्यात्तर्हि जातकः त्रिकालज्ञो भवति। यथोक्तं जातकपारिजाते –

त्रिकालज्ञो भवेज्जीवे स्वांशे मृद्वंशसंयुते।
गोपुराद्यंशके वाऽपि शुभांशे शुभवीक्षिते।।

अध्यायः 13, श्लो.68,

विशेषरूपेण सूर्यबुधौ केन्द्रे, त्रिकोणे, एकादशे वा स्यातां तर्हि जातको गणको भवति यथोक्तं भावार्थरत्नाकरे –

बुधभानू केन्द्रे कोणे लाभस्थौ गणको भवेत्।।

अध्यायः 2, श्लोकः 5

जातकतत्त्वग्रन्थानुसारं बलयुक्तः द्वितीयभावाधिपस्तथा विद्याकारको बुधः केन्द्रे, त्रिकोणे, एकादशे वा स्यात्तदा जातकः ज्योतिर्वित्सु श्रेष्ठो भवति। द्वितीयभावे विद्याबुद्धिकारको गुरुः स्वोच्चराशिगतो भवेत्तर्हि जातकः ज्योतिर्वित्सु श्रेष्ठो भवति। शुभग्रहेण दृष्टो बुद्धिकारको बुधः बृहस्पतिर्वा केन्द्रे त्रिकोणे भवेत्तर्हि जातको भविष्यवक्ता भवति। स्वनवांशगते मृदुषष्ट्यंशगते जीवेऽथवा शुभग्रहदृष्टे गोपुरांशगते जीवे जातकः त्रिकालज्ञो भवेत् [25]। द्वितीयेशः सूर्यः अथवा भौमः स्यात्तथा तयोरुपरि गुरोः वा शुक्रस्य दृष्टिर्भवेत्तर्हि जातकः जातकशास्त्रज्ञो भवति। बलयुक्तः द्वितीयेशः, केन्द्रस्थः बुधस्तथा पंचमस्थः शुक्रः स्यादथवा द्वितीये शुक्रः तृतीये कोऽपि शुभग्रहः स्यादथवा बलयुक्तः द्वितीयेशः, द्वितीयभावे उच्चराशिगतग्रहः शुक्रो वा भवेत्तर्हि जातकः ज्योतिषशास्त्रे प्रवीणो भवति।

द्वितीये भावे यदि कुजो भवति तर्हि जातकः तर्कशास्त्रज्ञो भवति। द्वितीयेशः सूर्यो वा भौमो गुरुशुक्राभ्यामवलोकितो वा सुर्यभौमयोरन्यतरे यत्र तत्र स्वपारावतांशगते सति जातकः तर्कशास्त्रे निपुणो भवति अथवा द्वितीये भावे सूर्यभौमौ भवेतां तर्हि जातकः तर्कशास्त्रमर्मज्ञो भवति। कारकांशकुण्डल्यां लग्ने अथवा पंचमे यदि भौमः स्यात्तर्हि जातकः नैयायिको, बुधः स्यात्तर्हि मीमांसकः, चन्द्रः स्यात्तर्हि सांख्ययोगज्ञः, साहित्यज्ञो, गायकश्च, सूर्यः स्यात्तर्हि वेदान्तज्ञः, गीतज्ञश्च जातको भवति [26]।

यदि पंचमभावे शनिसूर्यबुधाः स्थिताः भवेयुस्तर्हि जातकः वेदान्तशास्त्रे निपुणो भवति। जातकतत्त्वग्रन्थानुसारं बृहस्पतिः यदि केन्द्रे, त्रिकोणे वा भवेदथवा शुक्रः उत्तमांशे लग्नगतो भवेदथवा केन्द्रे कुत्रापि भवेत्तथा चन्द्रः देवलोकांशे स्यादथवा शनिः पारावतांशे स्यात्तथा बृहस्पतिरुपरि बुधस्य दृष्टिर्भवेदथवा धनेशः बुधः स्वोच्चराश्यां भवेत्, शनिः गोपुरांशे स्यात्तथा बृहस्पतिः सिंहासनांशे भवेदथवा लग्नेशः द्वितीयभावे, द्वितीयेशः पारावतांशे भवेत्तर्हि जातको वेदान्तज्ञो भवति [27]। यदि लग्नेशः द्वितीये शुक्रः द्वादशभावे च भवेदथवा स्वोच्चराशिगतशुभग्रहः केन्द्रे, शुक्रः द्वादशभावे च भवेदथवा लग्नेशः पारावतांशे, शुक्रः द्वादशभावे च भवेत्तदा एतेषु योगेषु जातको वेदान्तशास्त्रज्ञो भवति।

सम्पूर्णबलयुक्तः द्वितीयेशः गुरुः यदि सूर्यशुक्राभ्यामवलोकितो भवति तर्हि जातको व्याकरणशास्त्राभ्यासी भवति। कुण्डल्यां बुधः द्वितीयभावगतनवांशपतिर्भूत्वा स्वकीयाधिकारचतुष्के, गुरुः केन्द्रे तथा च शुक्रः स्वकीयसिंहासनांशे भवेत्तर्हि जातकः षडङ्गभूतानां विवेचको भवति [28]। भावार्थरत्नाकरग्रन्थानुसारं द्वितीये स्वोच्चराशिगतो स्वराशिगतो वा गुरुः स्यात्तदा जातकः वेदवेदाङ्गवित् जायते यथोक्तम्–

[21] फलदीपिका, अ.16, श्लो.6,
[22] फलितमार्त्तण्डः, भावफलाध्यायः, श्लो. 6–10,
[23] जातकतत्त्वं पंचमविवेकः, सूत्रम् 46–50,
[24] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 114,
[25] जातकतत्त्वं पंचमविवेकः, सूत्रम् 52–56,
[26] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 110–113,
[27] जातकतत्त्वं पंचमविवेकः, सूत्रम् 67–73,
[28] जातकपारिजातः, अध्यायः 11, श्लो. 83– 85,

द्वितीयस्थो यदि गुरुर्वेदवेदांगपारगः।
स्वोच्चस्वक्षेत्रयुक्तश्चेत् भवेदेवं न संशयः।।
अध्यायः 2, श्लोकः 7,

कारकांशकुण्डल्यां लग्ने अथवा पंचमे यदि एकाकी बृहस्पतिः स्थितो भवेत्तर्हि जातकः व्याकरणशास्त्रज्ञः तथा वेदवेदांगविदो भवति[29]। बलयुक्तगुरुद्वितीयेशयोरुपरि यदि शुक्रसूर्ययोर्दृष्टिर्भवेत्तर्हि जातकः व्याकरणशास्त्रज्ञो भवति।

चतुर्थभावशुक्रयोः सम्बन्धः नृत्यगानवाद्यादिना भवत्यतः चतुर्थभावे यदि शुक्रो भवति तर्हि जातकः गानविद्यायां निपुणो भवति एवं यदि शुक्रः द्वितीये भावे भवति चेत् जातकः कवित्वशक्तिसम्पन्नो भवति। दशमेशः लग्ने अथवा लाभेशः लाभे भवेत्तर्हि जातकः कविर्भवति। कारकांशलग्नेऽथवा तस्मात् पंचमे यदि चन्द्ररहितः शुक्रो भवति तर्हि जातकः कविर्वाग्मीकाव्यज्ञश्च भवति।

जैमिनिसूत्रानुसारं कारकांशकुण्डल्यां लग्ने अथवा पंचमे गुरुचन्द्रौ, शुक्रचन्द्रौ अथवा बुधचन्द्रौ भवतः तर्हि क्रमशः उत्तरोत्तरन्यूनग्रन्थकर्त्तुः योगो भवत्यर्थात् प्रथमयोगे उत्तमग्रन्थकर्ता ततः न्यूनः द्वितीये योगे तथा तृतीययोगे ततोऽपि न्यूनग्रन्थकर्ता जातको भवति [30]। कारकांशकुण्डल्यां लग्ने अथवा पंचमे चन्द्ररहीतः गुरुः एकाकी भवति तदा जातकः सर्वशास्त्रविदग्रन्थकारश्च भवति। परमस्मिन् योगे जातकः कुशलवक्ता न भवति [31]। पंचमेशः यदि एकादशभावगतो भवेत्तर्हि जातकः विद्वान् एवं ग्रन्थनिर्माणकर्ता भवति [32]।

यदि गुरुद्वितीयेशौ केन्द्रे त्रिकोणे वा स्यातां तर्हि जातकः सर्वविद्याप्रविणो सभापूज्यो च भवति। चन्द्रात् त्रिकोणे बृहस्पतिस्तथा बुधात् त्रिकोणे भौमः स्यात्तर्हि जातकः सर्वज्ञो भवति। ज्योतिषतत्त्वग्रन्थानुसारं पंचमभावगत एकोऽपि बलवान् शुभग्रहः जातकं शास्त्रकर्त्ता करोति। एकभावगतानां गुरुराहुशनिबुधानामुपरि शुक्रस्य दृष्टिर्यदि भवेत्तर्हि जातकः समस्तविद्यासु प्रवीणो भवति।

द्वितीयभावे यदि चन्द्रो भवति तर्हि जातकः कर्मकाण्डेषु निष्णातो भवति।

यदि कारकांशकुण्डल्यां लग्ने भौमः भवेदथवा भौम एवात्मकारको भवेत्तर्हि जातकः रसायनशास्त्रविदो भवति। कारकांशलग्ने यदि शुक्रो चन्द्रो वा भवेदथवा लग्नगतचन्द्रमुपरि शुक्रस्य दृष्टिर्भवेत्तर्हि जातकः औषधीनां निर्माता रसायनविदो भवति। यदि तं कारकांशलग्नगतचन्द्रमुपरि बुधस्य दृष्टिर्भवेत्तर्हि जातकः चिकित्सको भवति [33]। जन्मकुण्डल्यां यदि चतुर्थेशः दशमे भवेत् तर्हि जातकः रसायनशास्त्रज्ञो भवति [34]। सप्तमस्थद्वितीयेशः यदि पापग्रहेण युतो दृष्टो वा स्यात् तर्हि जातको भिषको भवति [35]। कारकांशात् चतुर्थे यदि शनिर्भवेत्तर्हि जातकः धानुष्कः भवति। चतुर्थे यदि सूर्यो वर्त्तते तर्हि खड्गी भवति। चतुर्थे यदि कुजो भवति चेत् जातकः कुन्ती भवति [36]। कारकांशलग्नात् त्रिकोणे यदि द्वौ पापग्रहौ भवेतां तर्हि जातकः मान्त्रिको भवति [37]।

एवमेव ज्योतिषशास्त्रस्य प्रत्येकग्रन्थेषु बहवः योगाः वर्णिताः सन्ति। प्रायः सर्वेषु ग्रन्थेषु लग्नद्वितीयचतुर्थपंचमभावेभ्यः लग्नेशद्वितीयेशचतुर्थेशपंचमेशेभ्यः गुरुबुधाभ्यां च विद्याबुद्धिविचारः कृतं वर्त्तते।

[29] विशिष्यवैयाकरणो वेदवेदांगविच्च।। जैमिनीसूत्रम् अ. 1, पा. 2, सू. 108,
[30] मतापित्रोश्चन्द्रगुरुभ्यां ग्रन्थकृत्। शुक्रेण किंचिदूनम्। बुधेन ततोऽपि। जै.सू. अ. 1, पा. 2, सू. 102–104,
[31] शुक्रेण कविवाग्मीकाव्यज्ञश्च। गुरुणा सर्वविद्ग्रन्थिकश्च। न वाग्मी। जै.सू. अ. 1, पा. 2, सू. 105–107,
[32] बृहत्पाराशरहोराशास्त्रम्, अध्या.25, श्लो. 59,
[33] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 86–87,
[34] बृहत्पाराशरहोराशास्त्रम्, अध्या.25, श्लो. 46,
[35] बृहत्पाराशरहोराशास्त्रम्, अध्या.25, श्लो. 19,
[36] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 96,100, 101,
[37] जैमिनीसूत्रम् अ. 1, पा. 2, सू. 83,